# लघु शांति स्तोत्र

||लघु-शान्ति स्तवन सूत्र ||

शान्तिं शान्ति-निशान्तं,
शान्तं शान्ता-शिवं नमस्कृत्य.

स्तोतुः शान्ति-निमित्तं,
मन्त्र-पदैः शान्तये स्तौमि........ .1.

ओमिति निश्चित-वचसे,
नमो नमो भगवतेर्हते पूजाम्.
शान्ति-जिनाय जयवते,
यशस्विने स्वामिने दमिनाम्....... .2

सकलातिशेषक-महा-संपत्ति-समन्विताय शस्याय.
त्रैलोक्य-पूजिताय च,
नमो नमः शान्ति-देवाय.....3

सर्वामर-सुसमूह-स्वामिक-संपूजिताय न जिताय.
भुवन-जन-पालनोद्यत-तमाय
सततं नमस्तस्मै.....4

सर्व-दुरितौघ-नाशन-कराय
सर्वाशिव-प्रशमनाय
दुष्ट ग्रह-भूत-पिशाच-शाकिनीनां प्रमथनाय............5

यस्येति नाम-मन्त्र-प्रधान-वाक्योपयोग-कृत-तोषा.
विजया कुरुते जन-हित-मिति च नुता नमत तं
शान्तिम्.......6

भवतु नमस्ते भगवति!,
विजये! सुजये! परा-परैरजिते!.
अपराजिते! जगत्यां,
जयतीति जयावहे! भवति......7

सर्वस्यापि च संघस्य,
भद्र-कल्याण-मंगल-प्रददे!.
साधूनां च सदा शिव-सुतुष्टि-पुष्टि-प्रदे! जीयाः ......8

भव्यानां कृत-सिद्धे!,
निर्वृति-निर्वाण-जननि! सत्त्वानाम्.
अभय-प्रदान-निरते!,
नमोस्तु स्वस्ति-प्रदे! तुभ्यम्..... .9

भक्तानां जन्तूनां, शुभावहे! नित्यमुद्यते! देवि!.
सम्यग्-दृष्टीनां
धृति-रति-मति-बुद्धि-प्रदानाय......10

eAstroHelp

जिन-शासन-निरतानां,
शान्ति-नतानां च जगति जनतानाम्.
श्री-संपत्कीर्ति-यशो-वर्द्धनि!,
जय देवि! विजयस्व......11

सलिला-नल-विष-विषधर-दुष्ट-ग्रह-राज-रोग-रण-भयतः.
राक्षस-रिपु-गण-मारि-चौरेति-श्वापदा-दिभ्यः.....12

अथ रक्ष रक्ष सुशिवं,
कुरु कुरु शान्तिं च कुरु कुरु सदेति
तुष्टिं कुरु कुरु पुष्टिं,
कुरु कुरु स्वस्तिं च कुरु कुरु त्वम्..13

भगवति! गुणवति! शिव-शान्ति-
तुष्टि-पुष्टि-स्वस्तीह कुरु कुरु जनानाम्.
ओमिति नमो नमो ह्राँ ह्रीँ ह्रूँ ह्रः,
यः क्षः ह्रीँ फट् फट् स्वाहा.......14

एवं-यन्नामाक्षर-पुरस्सरं, संस्तुता जया-देवी.
कुरुते शान्तिं नमतां,
नमो नमः शान्तये तस्मै........15

इति पूर्व-सूरि-दर्शित-मन्त्र-पद-विदर्भितः स्तवः शान्तेः.
सलिलादि-भय-विनाशी,
शान्त्यादि-करश्च भक्तिमताम्.....16

यश्चैनं पठति सदा,
शृणोति भावयति वा यथा-योगम्
स हि शान्ति-पदं यायात्,
सूरिः श्री-मान-देवश्च.....17

उपसर्गाः क्षयं यान्ति, छिद्यन्ते विघ्न-वल्लयः
मनः प्रसन्नतामेति, पूज्यमाने जिनेश्वरे...18

सर्व-मंगल-मांगल्यं, सर्व-कल्याण-कारणम्
प्रधानं सर्व-धर्माणां, जैनं जयति शासनम् 19

eAstroHelp